CLASS : 10th (Secondary) **Code No. 2808**

Series : Sec. M/2016

रोल नं० | | | | | | | | | | |

SET : A

संस्कृत

(Academic)

2nd Semester

(Only for Fresh/Re-appear Candidates)

शेमुषी (नई पुस्तक)

(Morning Session)

समय : ***2½*** *घण्टे]* *[पूर्णांक :* ***80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ* ***8*** *तथा प्रश्न* ***11*** *हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये* ***कोड नम्बर*** *तथा* ***सेट*** *को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है,* ***परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

निर्देश : *(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।

खण्डः 'क'

(अपठित - अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $5 \times 2 = 10$

संगणकं महत् - यन्त्रम् अस्ति। बैंकिंगक्षेत्रे अस्य योगदानम् अपूर्वम् अस्ति। संगणकेन देशस्य सुदूरतमे भागे विदेशे वा द्रुतगत्या रूप्यकाणां स्थानान्तरणं प्रेषणं वा कर्तुं शक्यते। अद्य अध्ययनस्य क्षेत्रे अपि अस्य योगदानं कदापि विस्मारयितुं न शक्यते। अद्य जीवनं तु संगणकं विना अपूर्णम् अस्ति। जालपुट (इन्टरनेट) माध्यमेन तु विश्वस्य जनैः सह वार्तालापः विचारविमर्शः च एकः क्रान्तिकारी प्रयोगः वर्तते।

(क) संगणकम् कीदृशं यन्त्रम् अस्ति ?

(ख) रूप्यकाणां स्थानान्तरणं केन कर्तुं शक्यते ?

(ग) कस्मिन् क्षेत्रे अस्य योगदानम् अपूर्वम् अस्ति ?

(घ) अद्य जीवनं संगणकं विना कीदृशम् अस्ति ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

खण्डः 'ख'

(रचनात्मक - लेखनम्)

2. (क) भवान् देवः। विद्यायाः महत्त्वम् वर्णयन् स्व-अनुजं प्रति लिखितं पत्रं मञ्जूषातः उचितपदैः पूरयित्वा उत्तरपुस्तिकायां लिखित – $5 \times 1 = 5$

परीक्षाभवनम्
तिथिः

प्रिय अनुज,

शुभाशीर्वादः।

अत्र कुशलं तत्रास्तु। मातुः पत्रम् प्राप्तम्। समाचारं ज्ञातं यत् तव पठने (i) ..... न अस्ति। एतत् तु न उचितम्। विद्याहीनः (ii) ..... पशुतुल्यः भवति। विद्यावान् (iii) ..... पूज्यते। अतः आलस्यं विहाय (iv) ..... कुरु। पठितानां (v) ..... पुनः पुनः अभ्यासं कुरु।

तव भ्राता
देवः

मञ्जूषा

परिश्रमम् , पाठानाम् , रुचिः, सर्वत्र, नरः।

(ख) चित्रं दृष्ट्वा मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत – $5 \times 1 = 5$

(i) इदं चित्रं ..... अस्ति।

(ii) सरोवरतटे विशालः ..... अस्ति।

(iii) वृक्षे ..... कूर्दन्ति।

(iv) चित्रे मृगाः ..... पिबन्ति।

(v) तटे बालकाः ..... क्रीडन्ति।

मञ्जूषा

जलम् ,कन्दुकेन, सरोवरतटस्य, वृक्षः, वानराः।

अथवा

(केवलं प्रज्ञाचक्षुर्भ्यः)

'मम विद्यालयः' इति विषयम् अधिकृत्य पंच-वाक्यानि संस्कृतभाषायां लिखत।

खण्डः 'ग'

(अनुप्रयुक्त - व्याकरणम्)

3. (क) 'गुणसन्धेः' अथवा 'व्यञ्जनसन्धेः' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

(ख) 'अव्ययीभावसमासस्य' अथवा 'कर्मधारयसमासस्य' परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

खण्डः 'घ'

(पठित - अवबोधनम्)

4. अधोलिखितगद्यांशस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) कश्चिद् राजा स्वमनसि निरन्तरं प्रवर्तमानायाजिज्ञासायाः समाधानाय कस्मिँश्चिदाश्रमे निवसतो मुनेः पार्श्वमुपागच्छत्। तदानीं मुनिः स्वकार्यसंलग्न एव राजानं यथेष्टमभ्यनन्दत्।

अथवा

(ख) चाणक्यः – भो श्रेष्ठिन्। चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति।

5. अधोलिखितश्लोकस्य हिन्दीभाषायां व्याख्या कार्या – 5

(क) सुलभेष्वर्थलाभेषु परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

अथवा

(ख) रात्रौ जानुर्दिवा भानुः सन्ध्ययोर्द्वयोः।
इत्थं शीतं मया नीतं जानु भानु कृशानु भिः।।

6. अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखित – $5 \times 2 = 10$

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्।

(क) निर्धनः केन पीडितः आसीत् ?

(ख) निर्धनः स्वपुत्रं द्रष्टुं कथं प्राचलत् ?

(ग) निर्धनः जनः परिश्रम्य किम् उपार्जितवान् ?

(घ) पिता कस्य रुग्णतामाकर्ण्य व्याकुलो जातः ?

(ङ) निर्धनः स्वपुत्रं कुत्र प्रवेशं दापयितुं सफलो जातः ?

7. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत – $3 \times 2 = 6$

रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयता –
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।

(क) कीदृशं वचः मा ब्रूहि ?

(ख) गगने बहवः के सन्ति ?

(ग) अम्भोदाः वृष्टिभिः काम् आर्द्रयन्ति ?

8. प्रदत्तसूक्तिषु ***द्वयोः*** भावार्थं लिखत – $2 \times 2\frac{1}{2} = 5$

(क) अद्याशनं शिशुजनस्य बलेन जातम्।

(ख) भोक्तारमर्धनयनेन विलोकयन्ति।

(ग) न सा बकसहस्रेण परितस्तीरवासिना।

9. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $5 \times 1 = 5$

(क) चौरः <u>कर्पटम्</u> क्षिप्त्वा निर्गतः।

(ख) <u>पुत्रं</u> द्रष्टुं सः प्रस्थितः।

(ग) <u>मालाकारः</u> तोयैः तरोः पुष्टिं करोति।

(घ) आर्यस्य <u>प्रसादेन</u> मे वाणिज्या अखण्डिता।

(ङ) राजा <u>शस्त्राहतस्य</u> सहायताम् अकरोत्।

10. प्रश्नपत्रे लिखितं श्लोकं विहाय 'शेमुषी' द्वितीयो भागः पाठ्यपुस्तकात् एकं श्लोकं संस्कृतभाषायां लिखत। 4

खण्डः 'ङ'

(बहुविकल्पीय - प्रश्नाः)

11. अधोलिखितप्रश्नानां प्रदत्तचतुर्षु वैकल्पिक-उत्तरेषु उचितमुत्तरं विचित्य लिखित – $16 \times 1 = 16$

(क) 'यन्न' इति पदे कः सन्धिविच्छेदः ?

(i) यः + न (ii) यत् + न

(iii) यो + न (iv) यान् + न

(ख) 'भोजन + अन्ते' अत्र सन्धियुक्तपदम् –

(i) भोजन्ते (ii) भोजने

(iii) भोजनाने (iv) भोजनान्ते

(ग) 'राजहंसः' इति पदस्य विग्रहपदम् –

(i) राजा च असौ हंसः (ii) राज्ञा हंसः

(iii) राज्ञः हंसः (iv) राज्ञि हंसः

(घ) 'राजपुरुषः' इति पदे कः समासः ?

(i) कर्मधारयः (ii) तत्पुरुषः

(iii) नञ्तत्पुरुषः (iv) द्विगुः

(ङ) 'निकषा' पदस्य योगे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया

(iii) द्वितीया (iv) पञ्चमी

(च) 'वन' शब्दस्य सप्तम्यैकवचने किं रूपम् ?

(i) वने (ii) वनस्य

(iii) वनेन (iv) वनाय

(छ) 'गच्छतु' इति पदे का धातुः ?

(i) गत् (ii) गच्

(iii) गम् (iv) गच्छत्

(ज) 'वर्षति' इति पदे कः लकारः ?

(i) लट् (ii) लुट्

(iii) लिट् (iv) लङ्

(झ) 'हसन्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) क्त्वा

(iii) तुमुन् (iv) शतृ

(ञ) 'पठ् + तव्यत्' इति संयोगे किं रूपम् ?

(i) पठतव्यत् (ii) पठितव्यः

(iii) पठित्वा (iv) पठितः

(ट) ..... भवतो व्यवहारेण कोपो मे गलितः।
(रिक्तस्थानपूर्तिः अव्ययपदेन)

(i) मुनिः (ii) राजा
(iii) आश्रमे (iv) अधुना

(ठ) 'महाकविः कालिदासः पुरा अभवत्।' अत्र अव्ययपदं किम् ?

(i) महाकविः (ii) कालिदासः
(iii) पुरा (iv) अभवत्

(ड) 'चतुः पञ्चाशत्' इति पदे का संख्या ?

(i) 44 (ii) 54
(iii) 64 (iv) 74

(ढ) 'पर्याकुलम्' इति पदस्य किं समानार्थकपदम् ?

(i) व्याकुलम् (ii) नष्टाः
(iii) हतम् (iv) हसन्

(ण) 'दयार्द्रः मुनिः' अत्र विशेषणपदम् किम् ?

(i) मुनिः (ii) मुनिना
(iii) दयार्द्रः (iv) दया

(त) 'कतिपयैः दिवसैः' अत्र विशेष्यपदम किम् ?

(i) कतिपयैः (ii) दिवसैः
(iii) कति (iv) दिवसः